This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-781

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 781 विषय पुराण

नाव. विष्णुप्रतिष्ठा MSS

लेखक/लिपीकार –

पृष्ठ 15 काळ – पूर्ण/~~अपूर्ण~~

M. 781

॥ हे पोथि बोधायनोक्त

॥ विष्णुप्रतिष्ठा ॥

बौ० वि०

१ ॥ श्रीगणेशाय नमः ॥ अथ बोधायनो
क्त विष्णुप्रतिष्ठाविधिः ॥ द्वादश्यां श्रोणा
यां वा यान्निन्यान्यान्निशुभनक्षत्राणि ते
पुतत्रकर्तापूर्वेद्युः कृतनित्यक्रियः कृता
धिकारप्रायश्चितः ॥ आचम्य देशका
लौ संकीर्त्य मम शाश्वतब्रह्मलोकावाप्ति
कामनया श्रीपरमेश्वरप्रीत्यर्थं विष्णुप्रति
ष्ठां करिष्ये ॥ तदंगगणेशपूजनादिना

१

नांदीश्राद्धांतं कृत्वा ॥ आचार्यादिन्वृणु
यात् ॥ आचार्यवर्णनं ॥ आचार्यस्तु०
यथा चतुर्मुखो० भगवन्सर्वधर्मज्ञ०
कर्मणामुपदेशकं० अस्य यागस्य निष्प
त्तौ० यमत्त्विजो बहुधा कल्पयंतः० अ
थवारुणी दीक्षा ॥ दंपत्योरुत्तरीयांते
सफलग्रंथीबंधः ॥ देवस्य त्वेत्यादिमं
त्रैः स्नपारभिषेकः ॥ यदाबध्नन्दाक्षायण०

इतिमंत्रेण यजमानकरे कुंकुमाक्तसूत्र
बंधनं॥ स्वस्तिनइतितिलककरणं॥ द
धिक्राव्णाइति दधिवंदनं॥ कांडात्कांडा
दितिदूर्वाभिर्मार्जनं॥ अक्षन्नमीमदं
तेत्यक्षतावंदनं॥ आचार्योऽक्षतान्
गृहीत्वा॥ करोतुस्वस्तिते ब्रह्मा॰ यथा
त्रिनहुषश्चैव॰ स्वस्तितेस्तु द्विपादेभ्यः
इतिपठित्वा॥ यजमानहस्ते अक्षता

न् दत्वा॥ वदेत् त्वं दीक्षितोसि नियमे
नस्थातव्यं॥ व्रतेनस्थाध्रुवक्षेमा॰ य
जमानाभिमंत्रणं॥ आचार्योभूतो
त्सारणांतंकृत्वा॥ मूर्तिसमीपंगत्वा॥
पंचगव्येन हिरण्यदूर्वांकुरयवाश्वत्थ
पलाशपर्णमिश्रोदकेन अभिषिंचेत्
मंत्रास्तु॥ आपोहिष्ठेतित्रिभिः॥
हिरण्यवर्णाःशुचयःपावकाया

सुजातः कश्यपो यास्विंद्रः ॥ अग्निं या गर्भं
दधिरे विरूपास्तान आपः शꣳ स्योना भ
वंतु ॥१॥ यासाꣳ राजा वरुणो याति मध्ये
सत्यानृते अवपश्यं जनानां ॥ मधुश्चुतः
शुचयो याः पावकास्ता० २ यासां देवा
दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा
भवंति ॥ याः पृथिवीं पयसोंदंति शुक्रा
स्ता० ३ शिवेन मा चक्षुषा पश्यतापः शि

वयातनुवोपस्पृशत त्वचं मे ॥ सर्वाꣳ अ
ग्नीꣳ रप्सुषदो हुवे वो मयि वर्चो बल
मोजो निधत्त ॥ ४ पवमानः सुवर्चनः ॥
पवित्रेण विचर्षणिः ॥ यः पोता स पुना
तु मा ॥ पुनंतु मा देवजनाः ॥ पुनंतु म
नवो धिया ॥ पुनंतु विश्व आयवः ॥ जा
तवेदः पवित्रवत् ॥ पवित्रेण पुनाहि
मा ॥ शुक्रेण देवदीद्यत् ॥ अग्ने क्रत्वा

ऋतूꣳरनु ॥ यत्तेपवित्रमर्चिषि ॥ अग्ने
विततमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभा
भ्यांदेवसवितः पवित्रेणसवेनच ॥ इदं
ब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदेव्यागा
त् ॥ यस्यैबह्वीस्तनुवोवीतपृष्ठाः ॥ त
यामदंतःसधमाद्येषु ॥ वयꣳस्यामप
तयोरयीणां ॥ वैश्वानरोरश्मिभिर्मा
पुनातु ॥ वातःप्राणेनेषिरोमयोभूः ॥

द्यावापृथिवीपयसापयोभिः ॥ ऋतावरी
यज्ञियेमापुनीतां ॥ बृहद्भिःसवितस्तृ
भिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेदक्षैः
पुनाहिमा ॥ येनदेवाअपुनतायेनापो
दिव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥ इदं
ब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥
ऋषिभिःसंभृतꣳरसं ॥ सर्वꣳसपूतम
श्नाति ॥ स्वदितंमातरिश्वना ॥ पावमा
नीर्योअध्येति ॥ ऋषिभिःसंभृतꣳरसं ॥

बो॰ वि॰

५ तस्मैसरस्वतीदुहे॥क्षीरꣳसर्पिर्मधूदकं॥
पावमानीःस्वस्त्ययनीः॥सुदुघाहिपय
स्वतीः॥ऋषिभिःसंभृतोरसः॥ब्राह्म
णेष्वमृतꣳहितं॥पावमानीर्दिशंतुनः॥
इमंलोकमथोअमुं॥कामान्समर्धयंतु
नः॥देवीर्देवैःसमाभृताः॥पावमानी
स्वस्त्ययनीः॥सुदुघाहिघृतश्चुतः॥ऋ
षिभिःसंभृतोरसः॥ब्राह्मणेष्वमृतꣳ
हितं॥येनदेवाःपवित्रेण॥आत्मानं ५

पुनतेसदा॥तेनसहस्रधारेण॥पावमा
न्यःपुनंतुमां॥प्राजापत्यंपवित्रं॥शतो
द्यामꣳहिरण्मयं॥तेनब्रह्मविदोवयं॥
पूतंब्रह्मपुनीमहे॥इंद्रःसुनीतीसह
मापुनातु॥सोमःस्वस्त्यावरुणःसमी
च्या॥यमोराजाप्रमृणाभिःपुनातुमा॥
जातवेदामोर्जयंत्यापुनातु॥१॥आहु
तिभिश्च॥ततःपुष्पाक्षतफलदूर्वायवां
कुरान्पादपीठेनिक्षिपति॥इदंविष्णु

रिति मंत्रेण मूर्तिस्थापयित्वा ॥ रक्षोहणमि
ति प्रतिसरं बध्वा ॥ संपूज्य वाससा कुशै
श्चाछाद्य ॥ अवतेहळोउदुत्तममिति ज
लेधिवासयेत् ॥ ॥ अथ द्वितीयेन्हि सद्यो
वा सर्वतोभद्रदेवताः संपूज्य प्रतिहारं
मही द्यौरित्यादिना कलशं संस्थाप्य ॥
स्नाताहतवाससश्चत्वारो ब्राह्मणाः
प्रतिमामुत्थापयेयुः ॥ उत्तिष्ठ ब्रह्मण
स्पत इति मंत्रेण ॥ ततो बोधायनोक्तं

पुण्याहं वाचयित्वा ॥ प्रार्थयेत् ॥ स्वागतं दे
वदेवेश विश्वरूप नमोस्तु ते ॥ शुद्धेपि त्व
दधिष्ठाने शुद्धिं कुर्मः सहस्वतां ॥ गायत्र्या
गोमूत्रं ॥ गंधद्वारामिति गोमयं ॥ आ
प्यायस्वेति दुग्धं ॥ दधिक्राव्ण इति द
धि ॥ शुक्रमसीति घृतं ॥ देवस्यत्वेति
कुशोदकं ॥ कपिलाया वरं दुग्धं श्वेता
यास्तु वरं दधि ॥ रक्ताया स्नेसंयुक्तं शेषं

८ शबलकृष्णायोः ॥ शमीपलाशखदिर
बिल्वाश्वत्थविकंकतन्यग्रोधपनसाम्र
शिरीषोदुंबराणां वृक्षत्वक्कषायकलशो
दकेनाभिषिंचेत् ॥ अश्वत्थेवेति मंत्रेण
मणिमुक्ताप्रवालरजतताम्रसुवर्णक
लशोदकेन हिरण्यवर्णा इति पूर्वोक्तमं
त्रेणाभिषिंचेत् ॥ अग्निः सप्तिमिति
लोहघातोत्तारणमपि केचिदाहुः ॥

ततो मूर्तिं पीठांतरे निवेश्य गंधपुष्पधू
पदीपनैवेद्यांतं संपूज्य ॥ आचार्यस्तै
जसपात्रस्थं मधु सुवर्णशलाकया गृ
हीत्वा ॥ नेत्रोन्मीलनं कुर्यात् ॥ तत्रा
दौ बलिं प्रदर्श्य ॥ हिरण्यगर्भ इति अ
ष्टदीपान् प्रज्वाल्य ॥ स्वयं पार्श्वे स्थित्वा
सतूपचोषं चित्रं देवानामिति मंत्रेणे
केकं नेत्रमुन्मीलयेत् ॥ तदानकोपि

६ पुरस्तिष्ठेत् ॥ ॐ नमो भगवते वासुदे
वाय हिरण्यरेतसे विश्वरूपधराय ल
क्ष्मीप्रियाय नम इति संलिख्य ॥ अं
जंति त्वामध्वरे देवयंत इति मंत्रेण
मभ्यंजनं कार्यं ॥ आचार्याय धेनुं द
द्यात् ॥ ततो देवमुत्थाप्य कुशप्रस्तरे
कु॰ शुभ्रे वस्त्रमाच्छाद्य प्राक्शिरसं देवं शा
ययेत् ॥ प्राजापत्याये मुहूर्तोस्तुर ६

युक्त्वा तत आचार्यः कुंडे स्थंडिले वा अ
ग्निं प्रतिष्ठाप्य ॥ ग्रहवेद्यां ग्रहान्संपू
ज्यान्वादध्यात् ॥ अस्मिन्नित्सादि च
क्षूषी आज्येनेसंतमुक्त्वात्र प्रधानं ॥
आदित्यादिग्रहान्समे उपपक्षे वास्तुं
सर्वतोभद्र देवाताः एकैकयाज्याहुत्या
पुनरत्र प्रधानं विष्णुं प्रतिपर्यायं पुरु
षसूक्तेन प्रत्यृचं एकैकयाज्याहुत्या ॥

बौ.

९ तत्परिवारदेवताः अष्टाविंशतिअष्टा
न्यतमसंख्याकाभिराज्याहुतिभिः वा
सुदेवाद्यंगदेवताः प्रत्येकं साज्यचरुस
राहुत्वा लक्ष्मीं तैरेव द्रव्यैः ॥ अष्टाविं
शत्यष्टाभिः शेषणस्याद्दि आज्यभा
गांतं कृत्वा अग्नेरुत्तरत संपातकलशं
मही द्यौरित्यादि संस्थाप्य संपूज्य ग्रहा
हुत्वा सर्वतोभद्रदेवश्च हुत्वा ॥ आचा ९

र्यः पुरुषसूक्तेनाज्याहुती हुत्वा ॥ प्रथ
मपर्यायेरिदं विष्णुरिति मंत्रेण पादयो
स्पृशेत् ॥ पुनस्तेनैवाज्याहुतीर्हुत्वा
विष्णोर्नुकमिति नाभिदेशे स्पृशेत् ॥
पुनस्तेनैवाहुत्वा अतो देवेति मूर्ध्नि स्पृ
शेत् ॥ प्रतिस्पर्शे संपातानभिषिंचे
त् ॥ मूर्तैः पंचोपचारैः संपूज्य ॥ तत आ
चार्य उदुत्यं जातवेदसमिति देवमु

बी

वि॰

१० स्थाप्य शाकुनसूक्तेन स्वस्थानं प्रवेश्य
मणिमुक्ताप्रवालसुवर्णरजतताम्राणि
गर्तमध्ये स्थापयित्वा ॥ अतो देवेति देवं
तत्रस्थाप्य ध्रुवा द्यौरिति तच्चेन स्थिरी
कृत्य प्रणमुक्त व्यस्तसमस्तव्याहृति
भिः ॥ ॐ भूः पुरुषमावाहयामि ॥
ॐ भुवः पुरुष० ॐ स्वः पुरुष० ॐ भूर्भु
वः स्वः पुरुषमा० ततो देवं स्पृष्ट्वा ॥

१०

इहैवैधि माप च्योष्ठा इति च तस्रो ऋचि
ओ जपित्वा ततः प्रणवेन कृतांगन्या
सः ॥ प्राणप्रतिष्ठा कृत्वा ॥ अस्य श्री
प्राणप्रतिष्ठामंत्रस्य ब्रह्मा विष्णु रु
द्रा ऋषयः ऋग्यजुःसामानि छंदां
सि चिद्रूपिणी शक्तिर्देवता आं बीजं
ह्रीं शक्तिः क्रों कीलकं देवशरीरे प्राण
प्रतिष्ठापने विनियोगः ॐ आं ह्रीं

ॐयंरंलंवंशंषंसंहंसः सोहंदेवस्य प्राण
इह प्राणाः ॥ पुनुः ओं० सोहंदेवस्य जी
व इह स्थितः ॥ पुनः ओं० सोहंदेवस्य स
र्वेंद्रियाणि ॥ पुनुः ओं० सोहंदेवस्य वा
ङ्मनश्चक्षुश्रोत्रजिह्वा घ्राणपाणिपा
दपायूपस्थ इहैवागत्य सुखं चिरं ति
ष्ठंतु स्वाहा इति मंत्रमुच्चरन् हृदये क
रं त्रिवारं पठेत् ॥ असुनीते पुन० पं

चदश प्रणवावृत्तिः क्रमेण संस्कारांजा
ता इति भावयेत् ॥ ततो देवस्य कर्णे दक्षिण
गायत्री वाचयेत् ॥ स्वागतं देवदेवे
श मद्भक्त्या त्वमिहागतः ॥ सान्निध्यं
सर्वदा देवस्यार्चायां परिकल्पय इ
ति प्रार्थ्य ॥ रत्नांबुकलशोदकेना
भिषिंचेत् ॥ ततः प्रणवेन कूर्चास
नं ददाति ॥ ततो दूर्वां विष्णुक्रांतरूपा

माकपनसपत्रकलशोदकेनपाद्यंददाति
क्षीरकुशाग्रेश्चाक्षतैर्यवतंदुलैसिद्धार्थकैश्च
यवतिलदूर्वाभिरेवश्चार्घ्यंददाति॥ एला
लवंगकंकोलकर्पूरमिश्रकलशोद
केनाचमनीयंददाति॥ इमा आपः शि
वतमाःपूताःपूततमामेध्यामेध्यतमाअ
मृता अमृतरसाः पाद्यार्घ्यास्ताजुषंतांप्र
तिगृह्णातुभगवान्महाविष्णुर्विष्णु
वेनमः॥ स्नानपर्यंतंअस्यांमंत्रस्यावृत्तिः

इदंविष्णुर्विचक्रमइतिगंधंददाति॥ इमेगं
धाःशुभादिव्याःसर्वगंधैरलंकृताः॥ पू
ताब्रह्मपवित्रेणपूताःसूर्यस्यरश्मिभिः इदं
विष्णुरितिप्रतिगृह्यतांप्रतिगृह्णातुभग
वान्महाविष्णुर्विष्णवेनमः इतिमंत्रेण
गंधंपुष्पंचददाति॥ ततोधूपं० दीपं० ने
वेद्यं० फलं० तांबूलं० दक्षिणां० अथकेश
वादिद्वादशनामभिःपुष्पांजलिंदद्यात्

तैरेव नामभिस्तर्पणं कुर्यात् ॥ कृसरान्नं
पायसान्नं गुडोदनं चित्रान्नं च पवित्रं त
त्तत्तन्नाममंत्रेण नैवेद्यं दद्यात् ॥ तांबू
लादिपुष्पांजल्यंते आज्यमिश्र कृसरा
न्नं जुहुयात् ॥ तद्यथा वासुदेवाय स्वाहा ॥
संकर्षणाय० प्रद्युम्नाय० अनिरुद्धाय०
शार्ङ्गिणे० सारस्वत्ये० महाविष्णवे० वि
ष्णोर्नुकं० १ तदस्य प्रियमभि० २ प्रतद्विष्णु

स्तवते० ३ परोमात्रया० ४ विचक्रमे प० ५
त्रिर्देवः प० ६ ततो द्वादशनामभिः अमुष्मै
स्वाहेत्याहुतिं हुत्वा स्विष्टकृतादि
होमशेषं समाप्य ॥ ग्रहबलिं दत्वा वि
ष्णवे बलिं दद्यात् मंत्रस्तु सामेकमाद्यं
पुरुषं पुराणं नारायणं विश्वसृजं यजा
महे ॥ तस्मिन्नेव यज्ञो निहितो विधेयस्त्व
मात्मनात्मन्प्रतिगृह्णीष्व हव्यं ॐ भर्द

१८ वः स्वरोऽभतिन्निरुक्तो बलिमुपहरेत्॥
पूर्णाहुत्यादिकर्मशेषं समाप्य॥ वि
श्वभुजे नमः॥ सर्वभुजे· अंतरात्म
ने· परमात्मने नमः इति नत्वा॥ पाव
च्छद्रवनी सूर्पास्ति षंस प्रति घातिनः
तावत्वपात्रदेवशस्थ्यं भक्त्यानुकंपया
इतिप्रार्थ्य॥ आचार्यादीसंपूज्य

१८

यथाविभवं स्वर्णभूषिताः दक्षागाः
आचार्यादिभ्यो दत्त्वा यथाविभवं
दक्षिणां दत्त्वा ब्रह्मचारीन्वृद्धा दत्त्वा ब्रा
ह्मणान् संयतान् भोजयीत्वा· भू
यसीं दत्त्वा यथासुखं विहरेत्॥ एवं
विष्णुप्रतिष्ठा प्राह भगवान् बौधा
यनः॥ शुभं भवतु॥ ५॥ ५॥

॥ हे पोथी विष्णु प्रतिष्टा समास: ॥

```
[OrderDescription]
,CREATED=28.08.19 10:54
,TRANSFERRED=2019/08/28 at 10:57:48
,PAGES=17
,TYPE=STD
,NAME=S0001567
,Book Name=M-781-VISHNUPRATISHTHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,
```